नाभिकन्दात्समुच्चार्य घण्टानादविसर्पणम्
ब्रह्मादिकारणात्यागाद् द्वादशान्तसमाश्रितम् ६०
मन्त्रञ्च मनसा भिन्नं प्राप्तानन्दरसोपमम्
द्वादशान्तात्समानीय निष्कलं व्यापकं शिवम् ६१
अष्टत्रिंशत्कलोपेतं सहस्रकिरणोज्ज्वलम्
सर्वशक्तिमयं साङ्गं ध्यात्वा लिङ्गे निवेशयेत् ६२
जीवन्यासो भवेदेवं लिङ्गे सर्वार्थसाधकः
पिण्डिकादिषु तु न्यासः प्रोच्यते साम्प्रतं यथा ६३
पिण्डिकाञ्च कृतस्नानां विलिप्ताञ्चन्दनादिभिः
सद्वस्त्रैश्च समाच्छाद्य रन्ध्रे च भगलक्षणे ६४
पञ्चरत्नादिसंयुक्तां लिङ्गस्योत्तरतः स्थिताम्
लिङ्गवत्कृतविन्यासां विधिवत्सम्प्रपूजयेत् ६५
कृतस्नानादिकान्तत्र लिङ्गमूले शिलां न्यसेत्
कृतस्नानादिसंस्कारं शक्त्यन्तं वृषभं तथा ६६
प्रणवपूर्वं हुं पूं ह्रीं मध्यादन्यतमेन च
क्रियाशक्तियुतां पिण्डीं शिलामाधाररूपिणीम् ६७
भस्मदर्भतिलैः कुर्यात् प्राकारत्रितयन्ततः
रक्षायै लोकपालांश्च सायुधान्पूजयेद्बहिः ६८

ॐ हूं हं क्रियाशक्तये नमः । ॐ हूं ह्रां हः महागौरी रुद्रदयिते स्वाहेति च पिण्डिकायां । ॐ हां आधारशक्तये नमः । ॐ हां वृषभाय नमः

धारिकां दीप्तिमत्युग्रा ज्योत्स्ना चैता बलोत्कटाः
तथा धात्री विधात्री च न्यसेद्वा पञ्चनायिकाः ९९
वामा ज्येष्ठा क्रिया ज्ञाना बेधा तिस्रोऽथवा न्यसेत्
क्रियाज्ञाना तथेच्छा च पूर्ववच्छान्तिमूर्तिषु १००
तमो मोहा च्क्षमी निष्ठा मृत्युर्मायाभवज्वराः
पञ्च चाथ महामोहा घोरा च त्रितयज्वराः १०१
तिस्रोऽथवा क्रियाज्ञाना तथा बाधाधिनायिका
आत्मादित्रिषु तत्त्वेषु तीव्रमूर्तिषु विन्यसेत् १०२
अत्रापि पिण्डिका ब्रह्मशिलादिषु यथाविधि
गौर्यादिसञ्ज्ञैरेव पूर्ववत् सर्वमाचरेत् १०३
एवं विधाय विन्यासं गत्वा कुण्डान्तिकं ततः
कुण्डमध्ये महेशानं मेखलासु महेश्वरम् १०४
क्रियाशक्तिं तथान्यासु नादमोष्ठे च विन्यसेत्
घटं स्थण्डिलवह्नीशैः नाडीसन्धानकन्ततः १०५
पद्मतन्तुसमां शक्तिमुद्घातेन समुद्यताम्
विशन्ती सूर्यमार्गेण निःसरन्तीं समुद्गताम् १०६

पुनश्च शून्यमार्गेण विशतीं स्वस्य चिन्तयेत्
एवं सर्वत्र सन्धेयं मूर्तिपैश्च परस्परम् १०७
सम्पूज्य धारिकां शक्तिं कुण्डे सन्तर्प्य च क्रमात्
तत्त्वतत्त्वेश्वरा मुर्तीर्मूर्तीशांश्च घृतादिभिः १०८
सम्पूज्य तर्पयित्वा तु सन्निधौ संहिताणुभिः
शतं सहस्रमर्धं वा पूर्णया सह होमयेत् १०९
तत्त्वतत्त्वेश्वरा मूर्तिर्मूर्तीशांश्च करेणुकान्
तथा सन्तर्प्य सान्निध्ये जुहुयुर्मूर्तिपा अपि ११०
ततो ब्रह्मभिरङ्गैश्च द्रव्यकालानुरोधतः
सन्तर्प्य शक्तिं कुम्भाम्भःप्रोक्षिते कुशमूलतः १११
लिङ्गमूलं च संस्पृश्य जपेयुर्होमसङ्ख्यया
सन्निधानं हृदा कुर्युर्वर्मणा चावगुण्ठनम् ११२
एवं संशोध्य ब्रह्मादि विष्णवान्तादि विशुद्धये
विधाय पूर्ववत्सर्वं होमसङ्ख्याजपादिकम् ११३
कुशमध्याग्रयोगेन लिङ्गमध्याग्रकं स्पृशेत्
यथा यथा च सन्धानं तदिदानीमिहोच्यते ११४

ॐ हाँ हँ ॐ ॐ ॐ एँ ॐ भूँ भूँ वाह्यमूर्तये नमः
ॐ हाँ वाँ ग्राँ ॐ ग्राँ षाँ ॐ भूँ भूँ वा वह्निमूर्तये नमः
एवञ्च यजमानादिमूर्तिभिरभिसन्धेयम्
पञ्चमूर्त्यात्मकेऽप्येवं सन्धानं हृदयादिभिः ११५
मूलेन स्वीयवीजैर्वा ज्ञेयन्तत्त्वत्रयात्मके
शिलापिराडी वृषेष्वेवं पूर्णाच्छिन्नं सुसंवरैः ११६
भागाभागविशुद्ध्यर्थं होमं कुर्याच्छतादिकं
न्यूनादिदोषमोषाय शिवेनाष्टाधिकं शतम् ११७
हुत्वाथ यत् कृतं कर्म शिवश्रोत्रे निवेदयेत्
एतत्समन्वितं कर्म त्वच्छक्तौ च मया प्रभो ११८
ॐ नमः भगवते रुद्राय रुद्र नमोऽस्तु ते
विधिपूर्णमपूर्णं वा स्वशक्त्यापूर्य गृह्यताम् ११९
ॐ ह्रीं शाङ्करि पूरय स्वाहा इति पिरिडकायाम्
ग्रथ लिङ्गे न्यसेज् ज्ञानी क्रियाख्यं पीठविग्रहे १२०
ग्राधाररूपिर्णी शक्तिं न्यसेद् ब्रह्मशिलोपरि
निबध्य सप्तरात्रं वा पञ्चरात्रं त्रिरात्रकम् १२१
एकरात्रमथो वापि यद्वा सद्योऽधिवासनम्
विनाधिवासनं यागः कृतोऽपि न फलप्रदः १२२

स्वमन्त्रैः प्रत्यहं देयमाहुतीनां शतं शतम्
शिवकुम्भादिपूजाञ्च दिग्बलिञ्च निवेदयेत् १२३
गुर्वादिसहितो वासो रात्रौ नियमपूर्वकम्
अधिवासः स वसतावधेर्भावः समीरितः १२४

इत्याग्नेये महापुराणे अधिवासनविधिर्नाम षण्णवतितमोऽध्यायः

अथ सप्तनवतितमोऽध्यायः

शिवप्रतिष्ठाकथनम्

ईश्वर उवाच

प्रातर्नित्यविधिं कृत्वा द्वारपालप्रपूजनम्
प्रविश्य प्राग्विधानेन देहशुद्ध्यादिमाचरेत् १
दिक्पतींश्च समभ्यर्च्य शिवकुम्भञ्च वर्धनीम्
अष्टमुष्टिकया लिङ्गं वह्निं सन्तर्प्य च क्रमात् २
शिवाज्ञातस्ततो गच्छेत् प्रासादं शस्त्रमुच्चरन्
तद्गतान् प्रक्षिपेद्विघ्नान् हुम्फडन्तशराणुना ३
न मध्ये स्थापयेल्लिङ्गं वेधदोषविशङ्कया
तस्मान् मध्यं परित्यज्य यवार्धेन यवेन वा ४
किञ्चिदीशानमाश्रित्य शिलां मध्ये निवेशयेत्
मूलेन तामनन्ताख्यां सर्वाधारस्वरूपिणीम् ५

सर्वगां सृष्टियोगेन विन्यसेदचलां शिलाम्
अथवानेन मन्त्रेण शिवस्यासनरूपिणीम् ६
ॐ नमो व्यापिनि भगवति स्थिरेऽचले ध्रुवे
ह्रं लं ह्रीं स्वाहा
त्वया शिवाज्ञया शक्ते स्थातव्यमिह सन्ततम् ७
इत्युक्त्वा च समभ्यर्च्य निरुध्याद्रौद्रमुद्रया
वज्रादीनि च रत्नानि तथोशीरादिकौषधीः ८
लोहान् हेमादिकांस्यान्तान् हरितालादिकांस्तथा
धान्यप्रभृतिशस्त्रांश्च पूर्वमुक्ताननुक्रमात् ९
प्रभारागत्वदेहत्ववीर्यशक्तिमयानिमान्
भावयन्नेकचित्तस्तु लोकपालेशसंवरैः १०
पूर्वादिषु च गर्तेषु न्यसेदेकैकशः क्रमात्
हेमजं तारजं कूर्मं वृषं वा द्वारसम्मुखम् ११
सरित्तटमृदा युक्तं पर्वयाग्रमृदाथवा
प्रक्षिपेन्मध्यगर्तादौ यद्वा मेरुं सुवर्णजम् १२
मधूकाक्षतसंयुक्तमञ्जनेन समन्वितम्
पृथिवीं राजतीं यद्वा यद्वा हेमसमुद्भवाम् १३

सर्ववीजसुवर्णाभ्यां समायुक्तां विनिक्षिपेत्
स्वर्णजं राजतं वापि सर्वलोहसमुद्भवम् १४
सुवर्णं कृशरायुक्तं पद्मनालं ततो न्यसेत्
देवदेवस्य शक्त्यादिमूर्तिपर्यन्तमासनम् १५
प्रकल्प्य पायसेनाथ लिप्त्वा गुग्गुलुनाथवा
श्वभ्रमाच्छाद्य वस्त्रेण तनुत्रेणास्त्ररक्षितम् १६
दिक्पतिभ्यो बलिं दत्त्वा समाचान्तोऽथ देशिकः
शिवेन वा शिलाश्वभ्रसङ्गदोषनिवृत्तये १७
शस्त्रेण वा शतं सम्यग् जुहुयात् पूर्णया सह
एकैकाहुतिदानेन सन्तर्प्य वास्तुदेवताः १८
समुत्थाप्य हृदादेवमासनं मङ्गलादिभिः
गुरुर्देवाग्रतो गच्छेन्मूर्तिपैश्च दिशि स्थितैः १९
चतुर्भिः सह कर्तव्या देवयज्ञस्य पृष्ठतः
प्रासादादि परिभ्रम्य भद्राख्यद्वारसम्मुखम् २०
लिङ्गं संस्थाप्य दत्त्वार्घ्यं प्रासादं सन्निवेशयेत्
द्वारेण द्वारबन्धेन द्वारदेशेन तच्छिला २१
द्वारबन्धे शिखाशून्ये तदर्धेनाथ तद्दृते
वर्जयन् द्वारसंस्पर्शं द्वारेणैव महेश्वरम् २२

देवगृहसमारम्भे कोणेनापि प्रवेशयेत्
अयमेव विधिर्ज्ञेयो व्यक्तलिङ्गोऽपि सर्वतः २३
गृहे प्रवेशनं द्वारे लोकैरपि समीरितम्
अपद्वारप्रवेशेन विदुर्गोत्रक्षयं गृहम् २४
अथ पीठे च संस्थाप्य लिङ्गं द्वारस्य सम्मुखम्
तूर्यमङ्गलनिर्घोषैर्दूर्वाक्षतसमन्वितम् २५
समुत्तिष्ठं हृदेत्युक्त्वा महापाशुपतं पठेत्
अपनीय घटं श्वभ्राद् देशिको मूर्तिपैः सह २६
मन्त्रं सन्धारयित्वा तु विलिप्तं कुङ्कुमादिभिः
शक्तिशक्तिमतोरैक्यं ध्यात्वा चैव तु रक्षितम् २७
लयान्तं मूलमुच्चार्य स्पृष्ट्वा श्वभ्रे निवेशयेत्
अंशेन ब्रह्मभागस्य यद्वा अंशद्वयेन च २८
अर्धेन वाष्टमांशेन सर्वस्याथ प्रवेशनम्
विधाय सीसकं नाभिदीर्घाभिः सुसमाहितः २९
श्वभ्रं वालुकयापूर्य ब्रूयात् स्थिरीभवेति च
ततो लिङ्गे स्थिरीभूते ध्यात्वा सकलरूपिणम् ३०
मूलमुच्चार्य शक्त्यन्तं सृष्ट्या च निष्कलं न्यसेत्
स्थाप्यमानं यदा लिङ्गं याम्यां दिशमथाश्रयेत् ३१

तत्तद्दिगीशमन्त्रेण पूर्णान्तं दक्षिणान्वितम्
सव्ये स्थाने च वक्रे च चलिते स्फुटितेऽपि वा ३२
जुहुयान् मूलमन्त्रेण बहुरूपेण वा शतम्
कुब्जान्येष्वपि दोषेषु शिवशान्तिं समाश्रयेत् ३३
युक्तं न्यासादिभिर्लिङ्गं कुर्वन्नेवं न दोषभाक्
पीठबन्धमतः कृत्वा लक्षणस्यांशलक्षणम् ३४
गौरीमन्त्रं लयं नीत्वा सृष्ट्या पिण्डीञ्च विन्यसेत्
सम्पूर्य पार्श्वसंसिद्धिं वालुकावज्रलेपनम् ३५
ततो मूर्तिधरैः सार्धं गुरुः शान्तिं घटोर्ध्वतः
संस्थाप्य कलसैरन्यैस्तद्वत् पञ्चामृतादिभिः ३६
विलिप्य चन्दनाद्यैश्च सम्पूज्य जगदीश्वरम्
उमामहेशमन्त्राभ्यां तौ स्पृशेल्लिङ्गमुद्रया ३७
ततस्त्रितत्त्वविन्यासं षडर्चादिपुरःसरम्
कृत्वा मूर्तिं तदीशानामङ्गानां ब्रह्मणामथ ३८
ज्ञानी लिङ्गे क्रियापीठे विनास्य स्नापयेत्ततः
गन्धैर्विलिप्य सन्धूप्य व्यापित्वेन शिवे न्यसेत् ३९
स्त्रग्धूपदीपनैवेद्यैर्हृदयेन फलानि च
विनिवेद्य यथाशक्ति समाचम्य महेश्वरम् ४०

दत्त्वार्घं च जपं कृत्वा निवेद्य वरदे करे
चन्द्रार्क्कतारकं यावन् मन्त्रेण शैवमूर्तिपैः ४१
स्वेच्छयैव त्वया नाथ स्थातव्यमिह मन्दिरे
प्रणम्यैव वहिर्गत्वा हृदा वा प्रणवेन वा ४२
संस्थाप्य वृषभं पश्चात् पूर्ववद्बलिमाचरेत्
न्यूनादिदोषमोषाय ततो मृत्युजिता शतम् ४३
शिवेन सशिवो हुत्वा शान्त्यर्थं पायसेन च
ज्ञानाज्ञानकृतं यच्च तत् पूरय महाविभो ४४
हिरण्यपशुभूम्यादि गीतवाद्यादिहेतवे
अम्बिकेशाय तद् भक्त्या शक्त्या सर्वं निवेदयेत् ४५
दानं महोत्सवं पश्चात् कुर्याद्दिनचतुष्टयम्
त्रिसन्ध्यं त्रिदिनं मन्त्री होमयेन् मूर्तिपैः सह ४६
चतुर्थेऽहनि पूर्णाञ्च चरुकं बहुरूपिणा
निवेद्य सर्वकुण्डेषु सम्पाताहुतिसोधितम् ४७
दिनचतुष्टयं यावत्तन्निर्माल्यन्तदूर्ध्वतः
निर्माल्यापनयं कृत्वा स्नापयित्वा तु पूजयेत् ४८
पूजा सामान्यलिङ्गेषु कार्या साधारणाणुभिः
विहाय लिङ्गचैतन्यं कुर्यात् स्थाणुविसर्जनम् ४९

असाधारणलिङ्गेषु क्षमस्वेति विसर्जनम्
आवाहनमभिव्यक्तिर्विसर्गः शक्तिरूपता ५०
प्रतिष्ठान्ते क्वचित् प्रोक्तं स्थिराद्याहुतिसप्तकम्
स्थिरस्तथाप्रमेयश्चानादिबोधस्तथैव च ५१
नित्योऽथ सर्वगश्चैवाविनाशी दृष्ट एव च
एते गुणा महेशस्य सन्निधानाय कीर्तिताः ५२
ॐ नमः शिवाय स्थिरो भवेत्याहुतीनां क्रमः
एवमेतच्च सम्पाद्य विधाय शिवकुम्भवत् ५३
कुम्भद्वयञ्च तन्मध्यादेककुम्भाम्भसा भवम्
संस्नाप्य तद् द्वितीयन्तु कर्तृस्नानाय धारयेत् ५४
दत्त्वा बलिं समाचम्य वहिर्गच्छेत् शिवाज्ञया
जगतीवाह्यतश्चण्डमैशान्यान्दिशि मन्दिरे ५५
धामगर्भप्रमाणे च सुपीठे कल्पितासने
पूर्ववन् न्यासहोमादि विधाय ध्यानपूर्वकम् ५६
संस्थाप्य विधिवत्तत्र ब्रह्माङ्गैः पूजयेत्ततः
अङ्गानि पूर्वयुक्तानि ब्रह्माणी त्वर्चना यथा ५७

एवं सद्योजाताय ॐ हूं फट् नमः । ॐ विं वामदेवाय हूं फट्
नमः । ॐ वुँ अघोराय हूँ फट् नमः । ॐ तत्पुरुषाय वौमीशानाय
च हूं फट्

जपं विवेद्य सन्तर्प्य विज्ञाप्य नतिपूर्वकम्
देवः सन्निहितो यावत्तावत्त्वं सन्निधौ भव ५८
न्यूनाधिकञ्च यत्किञ्चित् कृतमज्ञानतो मया
त्वत्प्रसादेन चण्डेश तत् सर्वं परिपूरय ५९
वाणलिङ्गे वाणरोहे सिद्धलिङ्गे स्वयम्भुवि
प्रतिमासु च सर्वासु न चण्डोऽधिकृतो भवेत् ६०
अद्वैतभावनायुक्ते स्थण्डिलेशविधावपि
अभ्यर्च्य चण्डं ससुतं यजमानं हि भार्यया ६१
पूर्वस्थापितकुम्भेन स्नापयेत् स्नापकः स्वयम्
स्थापकं यजमानोऽपि सम्पूज्य च महेशवत् ६२
वित्तशाठ्यं विना दद्याद् भूहिरण्यादि दक्षिणाम्
मूर्तिमान् विधिवत् पश्चात् जापकान् ब्राह्मणांस्तथा ६३
देवज्ञं शिल्पिनं प्राच्र्य दीनानाथादि भोजयेत्
यदत्र सम्मुखीभावे स्वेदितो भगवन्मया ६४
क्षमस्व नाथ तत् सर्वं कारुण्याम्बुनिधे मम
इति विज्ञप्तियुक्ताय यजमानाय सद्गुरुः ६५

प्रतिष्ठापुरायसद्भावं स्फुरत्तारकसप्रभम्
कुशपुष्पाक्षतोपेतं स्वकरेण समर्पयेत् ६६
ततः पाशुपतोपेतं प्रणम्य परमेश्वरम्
ततोऽपि बलिभिर्भूतान् सन्निधाय निबोधयेत् ६७
स्थातव्यं भवता तावद् यावत् सन्निहितो हरः
गुरुर्वस्त्रादिसंयुक्तं गृह्णीयाद्यागमराडपम् ६८
सर्वोपकरणं शिल्पी तथा स्नापनमराडपम्
अन्ये देवादयः स्थाप्या मन्त्रैरागमसम्भवैः ६९
आदिवर्णस्य भेदाद्वा सुतत्त्वव्याप्तिभाविताः
साध्य प्रमुखदेवाश्च सरिदोषधयस्तथा ७०
क्षेत्रपाः किन्नराद्याश्च पृथिवीतत्त्वमाश्रिताः
स्नानं सरस्वतीलक्ष्मीनदीनामम्भसि क्वचित् ७१
भुवनाधिपतीनाञ्च स्थानं यत्र व्यवस्थितिः
अराडवृद्धिप्रधानान्तं त्रितत्त्वं ब्रह्मणः पदम् ७२
तन्मात्रादिप्रधानान्तं पदमेतत् त्रिकं हरेः
नाटयेशगणमातृणां यक्षेशशरजन्मनाम् ७३
अराडजाः शुद्धविद्यान्तं पदं गणपतेस्तथा
मायांशदेशशक्त्यनतं शिवाशिवोप्तरोचिषाम् ७४

पदमीश्वरपर्यन्तं व्यक्तार्चासु च कीर्तितम्
कूर्माद्यं कीर्तितं यच्च यच्च रत्नादिपञ्चकम् ७५
प्रक्षिपेत् पीठगर्ते च पञ्चब्रह्मशिलां विना
षड्भिर्विभाजिते गर्ते त्यक्त्वा भावञ्च पृष्ठतः ७६
स्थापनं पञ्चमांशे च यदि वा वसुभाजिते
स्थापनं सप्तमे भागे प्रतिमासु सुखावहम् ७७
धारणाभिर्विशुद्धिः स्यात् स्थापने लेपचित्रयोः
स्नानादि मानसन्तत्र शिलारत्नादिवेशनम् ७८
नेत्रोद्घाटनमन्त्रेष्टमासनादिप्रकल्पनम्
पूजा निरम्बुभिः पुष्पैर्यथा चित्रं न दुष्यति ७९
विधिस्तु चललिङ्गेषु सम्प्रत्येव निगद्यते
पञ्चभिर्वा त्रिभिर्वापि पृथक् कुर्याद् विभाजिते ८०
भागत्रयेण भागांशो भवेद्भागद्वयेन वा
स्वपीठेष्वपि तद्वत् स्याल्लिङ्गेषु तत्त्वभेदतः ८१
सृष्टिमन्त्रेण संस्कारो विधिवत् स्फाटिकादिषु
किञ्च ब्रह्मशिलारत्नप्रभूतेश्चानिवेदनम् ८२
योजनं पिण्डिकायाश्च मनसा परिकल्पयेत्
स्वयम्भूवाणलिङ्गादौ संस्कृतौ नियमो न हि ८३

स्नापनं संहितामन्त्रैर्न्यासं होमञ्च कारयेत्
नदीसमुद्ररोहाणां स्थापनं पूर्ववन् मतम् ८४
ऐहिकं मृण्मयं लिङ्गं पिष्टकादि च तत्क्षणात्
कृत्वा सम्पूजयेच्छुद्धं सीक्षणादिविधानतः ८५
समादाय ततो मन्त्रानात्मानं सन्निधाय च
तज्जले प्रक्षिपेल्लिङ्गं वत्सरात् कामदं भवेत् ८६
विष्णवादिस्थापनं चैव पृथङ्मन्त्रैः समाचरेत्
इत्याग्नेये महापुराणे शिवप्रतिष्ठा नाम सप्तनवतितमोऽध्यायः

अथाष्टनवतितमोऽध्यायः

गौरीप्रतिष्ठाकथनम्

ईश्वर उवाच
वक्ष्ये गौरीप्रतिष्ठाञ्च पूजया सहितां शृणु
मण्डपाद्यं पुरो यच्च संस्थाप्य चाधिरोपयेत् १
शय्यायायान्तांश्च विन्यस्य मन्त्रान्मूर्त्यादिकान् गुह
आत्मविद्याशिवान्तञ्च कुर्यादीशनिवेशनम् २
शक्तिं परां ततो न्यस्य हुत्वा जप्त्वा च पूर्ववत्
सन्धाय च तथा पिण्डीं क्रियाशक्तिस्वरूपिणीम् ३

सदेशव्यापिकां ध्यात्वा न्यस्तरत्नादिकां तथा
एवं संस्थाप्य तां पश्चाद्देवीन्तस्यान्नियोजयेत् ४
परशक्तिस्वरूपान्तां स्वाणुना शक्तियोगतः
ततो न्यसेत् क्रियाशक्तिं पीठे ज्ञानञ्च विग्रहे ५
ततोऽपि व्यापिनीं शक्तिं समावाह्य नियोजयेत्
अम्बिकां शिवनाम्नीञ्च समालभ्य प्रपूजयेत् ६

ॐ आधारशक्तये नमः । ॐ कूर्माय नमः । ॐ स्कन्दाय च तथा नमः । ॐ ह्रीं नारायणाय नमः । ॐ ऐश्वर्याय नमः
ॐ अं अधश्छदनाय नमः । ॐ पद्मासनाय नमः । ॐ ऊर्ध्वच्छदनाय नमः । ॐ पद्मासनाय नमः । अथ सम्पूज्याः केशवास्तथा । ॐ ह्रीं कर्णिकाय नमः । ॐ त्नं पुष्कराक्तेभ्य इहार्चयेत् । ॐ हां पुष्टयै ह्रीं च ज्ञानायै हूं क्रियायै ततो नमः । ॐ नालाय नमः । रुं धर्माय नमः । रुं ज्ञानाय वै नमः । ॐ वैराग्याय नमः । ॐ वै अधर्माय नमः । ॐ रुं अज्ञानाय वै नमः । ॐ अवैराग्याय वै नमः । अं अनैश्वर्याय नमः । हुं वाचे हुं च रागिण्यै क्रें ज्वालिन्यै ततो नमः । ॐ ह्रौं शमायै च नमः । हुं ज्येष्ठायै ततो नमः । ॐ ह्रौं रौं क्रौं नवशक्त्यै गौं च गौर्यासनाय च । गौं गौरीमूर्तये नमः । गौर्या मूलमथोच्यते । ॐ ह्रीं सः महागौरि रुद्रदयिते स्वाहा । गौर्यै नमः । गां हूं ह्रीं शिवो गूं स्यात् शिवायै कवचाय च । गों नेत्राय च गों अस्त्राय ॐ गौं विज्ञानशक्तये ॐ गूं

क्रियाशक्तये नमः । पूर्वादौ शक्रादिकान् । ॐ सुं सुभागायै नमः
। ह्रीं वीजललिता ततः । ॐ ह्रीं कामिन्यै च नमः । ॐ ह्रूं स्यात्
कामशालिनीमन्त्रैर्गौरीं प्रतिष्ठाप्य प्राच्र्य जप्त्वाथ सर्वभाक्
इत्याग्नेये महापुराणे गौरीप्रतिष्ठा नामाष्टनवतितमोऽध्यायः

अथोनशततमोऽध्यायः

सूर्यप्रतिष्ठाकथनम्

ईश्वर उवाच

वक्ष्ये सूर्यप्रतिष्ठाञ्च पूर्ववन्मण्डपादिकम्
स्नानादिकञ्च सम्पाद्य पूर्वोक्तविधिना ततः १
विद्यामासनशय्यायां साङ्गं विन्यस्य भास्करम्
त्रितत्त्वं विन्यसेत्तत्र सस्वरं खादिपञ्चकम् २
शुद्ध्यादि पूर्ववत् कृत्वा पिण्डीं संशोध्य पूर्ववत्
सदेशपदपर्यन्तं विन्यस्य तत्तु पञ्चकम् ३
शक्त्या च सर्वतोमुख्या संस्थाप्य विधिवत्ततः
स्वाणुना विधिवत् सूर्यं शक्त्यन्तं स्थापयेद्गुरुः ४
स्वाम्यन्तमथवादित्यं पादान्तन्नाम धारयेत्
सूर्यमन्त्रास्तु पूर्वोक्ता द्रष्टव्याः स्थापनेऽपि च ५
इत्याग्नेये महापुराणे सूर्यप्रतिष्ठा नामैकोनशततमोऽध्यायः

अथ शततमोऽध्यायः
द्वारप्रतिष्ठाकथनम्

ईश्वर उवाच

द्वाराश्रितप्रतिष्ठाया वक्ष्यामि विधिमप्यथ
द्वाराङ्गानि कषायाद्यैः संस्कृत्य शयने न्यसेत् १
मूलमध्याग्रभागेषु त्रयमात्मादिसेश्वरम्
विन्यस्य सन्निवेश्याथ हुत्वा जप्त्वात्र रूपतः २
द्वारादथो यजेद्वास्तुन्तत्रैवानन्तमन्त्रतः
रत्नादिपञ्चकं न्यस्य शान्तिहोमं विधाय च ३
यवसिद्धार्थकाक्रान्ता ऋद्धिवृद्धिमहातिलाः
गोमृत्सर्षपरागेन्द्रमोहनीलक्ष्मणामृता ४
रोचना रुग् वचो दूर्वा प्रसादाधश्च पोटलीम्
प्रकृत्योदुम्बरे बद्ध्वा रक्षार्थं प्रणवेन तु ५
द्वारमुत्तरतः किञ्चिदाश्रितं सन्निवेशयेत्
आत्मतत्त्वमधो न्यस्य विद्यातत्त्वञ्च शाखयोः ६
शिवमाकाशदेशे च व्यापकं सर्वमङ्गले
ततो महेशनाथं च विन्यसेन्मूलमन्त्रतः ७

द्वाराश्रितांश्च तल्पादीन् कृतयुक्तैः स्वनामभिः
जुहुयाच्छतमर्धं वा द्विगुणं शक्तितोऽथवा ८
न्यूनादिदोषमोषार्थं हेतितो जुहुयाच्छतम्
दिग्बलिम्पूर्ववद्धुत्वा प्रदद्याद्दक्षिणादिकम् ९
इत्याग्नेये महापुराणे द्वारप्रतिष्ठा नाम शततमोऽध्यायः

अथैकाधिकशततमोऽध्यायः

प्रासादप्रतिष्ठा

ईश्वर उवाच

प्रासादस्थापनं वक्ष्ये तच्चैतन्यं स्वयोगतः
शुकनाशासमाप्तौ तु पूर्ववेद्याश्च मध्यतः १
आधारशक्तितः पद्मे विन्यस्ते प्रणवेन च
स्वर्णाद्ये कतमोद्भूतं पञ्चगव्येन संयुतम् २
मधुक्षीरयुतं कुम्भं न्यस्तरत्नादिपञ्चकं
स्रग्वस्त्रं गन्धलिप्तञ्च गन्धवत्पुष्पभूषितम् ३
चूतादिपल्लवानाञ्च कृती कृत्यञ्च विन्यसेत्
पूरकेण समादाय सकलीकृतविग्रहः ४
सर्वात्मभिन्नमात्मानं स्वाणुना स्वान्तमारुतः
आज्ञया बोधयेच्छम्भौ रेचकेन ततो गुरुः ५

द्वादशान्तात् समादाय स्फुरद्वह्निकणोपमम्
निक्षिपेत् कुम्भगर्भे च न्यस्ततन्त्रातिवाहिकम् ६
विग्रहन्तद्गुणानाञ्च बोधकञ्च कलादिकम्
क्षान्तं वागीश्वरं तत्तु व्रातं तत्र निवेशयेत् ७
दश नाडीर्दश प्राणानिन्द्रियाणि त्रयोदश
तदधिपांश्च संयोज्य प्रणवाद्यैः स्वनामभिः ८
स्वकार्यकारणत्वेन मायाकाशनियामिकाः
विद्येशान् प्रेरकान् शम्भुं व्यापिनञ्च सुसम्बरैः ९
अङ्गानि च विनिक्षिप्य निरुन्ध्याद्रोधमुद्रया
सुवर्णाद्युद्भवं यद्वा पुरुषं पुरुषानुगम् १०
पञ्चगव्यकषायाद्यैः पूर्ववत् संस्कृतन्ततः
शय्यायां कुम्भमारोप्य ध्यात्वा रुद्रमुमापतिम् ११
तस्मिंश्च शिवमन्त्रेण व्यापकत्वेन विन्यसेत्
सन्निधानाय होमञ्च प्रोक्षणं स्पर्शनं जपम् १२
सान्निध्याबोधनं सर्वम्भागत्रयविभागतः
विधायैवं प्रकृत्यन्ते कुम्भे तं विनिवेशयेत् १३
इत्याग्नेये महापुराणे प्रासादकृत्यप्रतिष्ठा नामैकाधिकशततमोऽध्यायः

अथ द्व्यधिकशततमोऽध्यायः

ध्वजारोपणम्

ईश्वर उवाच

चूलके ध्वजदण्डे च ध्वजे देवकुले तथा
प्रतिष्ठा च यथोद्दिष्टा तथा स्कन्द वदामि ते १
तडागार्धप्रवेशाद्वा यद्वा सवार्धवेशनात्
ऐष्टके दारुजः शूलः शैलजे धाम्नि शैलजः २
वैष्णवादौ च चक्राढ्यः कुम्भः स्यान्मूर्तिमानतः
स च त्रिशूलयुक्तस्तु अग्रचूलाभिधो मतः ३
ईशशूलः समाख्यातो मूर्ध्नि लिङ्गसमन्वितः
वीजपूरकयुक्तो वा शिवशास्त्रेषु तद्विधः ४
चित्रो ध्वजश्च जङ्घातो यथा जङ्घार्धतो भवेत्
भवेद्वा दण्डमानस्तु यदि वा तद्यदृच्छया ५
महाध्वजः समाख्यातो यस्तु पीठस्य वेष्टकः
शक्रैर्ग्रहै रसैर्वापि हस्तैर्दण्डस्तु सम्मितः ६
उत्तमादिक्रमेणैव विज्ञेयः शूरिभिस्ततः
वंशजः शालजातिर्वा स दण्डः सर्वकामदः ७

अयमारोप्यमाणस्तु भङ्गमायाति वै यदि
राज्ञोऽनिष्टं विजानीयाद्यजमानस्य वा तथा ८
मन्त्रेण बहुरूपेण पूर्ववच्छान्तिमाचरेत्
द्वारपालादिपूजाञ्च मन्त्राणान्तर्पणान्तथा ९
विधाय चूलकं दण्डं स्नापयेदस्त्रमन्त्रतः
अनेनैव तु मन्त्रेण ध्वजं सम्प्रोक्ष्य देशिकः १०
मृदु कषायादिभिः स्नानं प्रासादङ्कारयेत्ततः
विलिप्य रसमाच्छाद्य शय्यायां न्यस्य पूर्ववत् ११
चूडके लिङ्गवर्णन्यासो न च ज्ञानं न च क्रिया
विशेषार्था चतुर्थी च न च कुण्डस्य कल्पना १२
दण्डे तयार्थतत्त्वञ्च विद्यातत्त्वं द्वितीयकम्
सद्योजातानि वक्त्राणि शिवतत्त्वं पुनर्ध्वजे १३
निष्कलञ्च शिवन्तत्र न्यस्ताङ्गानि प्रपूजयेत्
चूडके च ततो मन्त्रो सान्निध्ये सहिताणुभिः १४
होमयेत् प्रतिभागञ्च ध्वजे तैस्तु फडन्तिकैः
अन्यथापि कृतं यच्च ध्वजसंस्कारणं क्वचित् १५
अस्त्रयागविधावेवं तत्सर्वमुपदर्शितम्
प्रासादे कारिते स्थाने स्रग्वस्त्रादिविभूषिते १६

जङ्घा वेदी तदूर्ध्वे तु त्रितत्त्वादि निवेश्य च
होमादिकं विधायाथ शिवं सम्पूज्य पूर्ववत् १७
सर्वतत्त्वमयं ध्यात्वा शिवञ्च व्यापकं न्यसेत्
अनन्तं कालरुद्रञ्च विभाव्य च पदाम्बुजे १८
कुष्माण्डहाटकौ पीठे पातालनरकैः सह
भुवनैर्लोकपालैश्च शतरुद्रादिभिर्वृतम् १९
ब्रह्माण्डकमिदं ध्यात्वा जङ्घाताञ्च विभावयेत्
वारितेजोऽनिलव्योमपञ्चाष्टकसमन्वितम् २०
सर्वावरणसञ्ज्ञञ्च वृद्धयोन्यन्तकान्वितम्
योगाष्टकसमायुक्तं नाशावधि गुणत्रयम् २१
पटस्थं पुरुषं सिंहं वामञ्च परिभावयेत्
मञ्जरीवेदिकायाञ्च विद्यादिकचतुष्टयम् २२
कण्ठे मायां सरुद्राञ्च विद्याश्चामलसारके
कलसे चेश्वरं विन्दुं विद्येश्वरसमन्वितम् २३
जटाजूटञ्च तं विद्याच्छूलं चन्द्रार्धरूपकम्
शक्तित्रयं च तत्रैव दण्डे नादं विभाव्य च २४
ध्वजे च कुण्डलीं शक्तिमिति धाम्नि विभावयेत्
जगत्या वाथ सन्धाय लिङ्गं पिण्डिकयाथवा २५

समुत्थाप्य सुमन्त्रैश्च विन्यस्ते शक्तिपङ्कजे
न्यस्तरत्नादिके तत्र स्वाधारे विनिवेशयेत् २६
यजमानो ध्वजे लग्ने बन्धुमित्रादिभिः सह
धाम प्रदक्षिणीकृत्य लभते फलमीहितम् २७
गुरुः पाशुपतं ध्यायन् स्थिरमन्त्राधिपैर्युतम्
अधिपान् शस्त्रयुक्तांश्च रक्षणाय निबोधयेत् २८
न्यूनादिदोषशान्त्यर्थं हुत्वा दत्त्वा च दिग्बलिम्
गुरवे दक्षिणां दद्याद् यजमानो दिवं व्रजेत् २९
प्रतिमालिङ्गवेदीनां यावन्तः परमाणवः
तावद्युगसहस्राणि कर्तुर्भोगभुजः फलम् ३०

इत्याग्नेये महापुराणे ध्वजारोहणादिविधिर्नाम
द्व्यधिकशततमोऽध्यायः

अथ त्र्यधिकशततमोऽध्यायः

जीर्णोद्धारः

ईश्वर उवाच
जीर्णादीनाञ्च लिङ्गानामुद्धारं विधिना वदे
लक्ष्मोज्झितञ्च भग्नञ्च स्थूलं वज्रहतं तथा १

संपुटं स्फुटितं व्यङ्गं लिङ्गमित्येवमादिकम्
इत्यादिदुष्टलिङ्गानां योज्या पिराडी तथा वृषः २
चालितञ्चलितं लिङ्गमत्यर्थं विषमस्थितम्
दिङ्मूढं पातितं लिङ्गं मध्यस्थं पतितं तथा ३
एवंविधञ्च संस्थाप्य निर्व्रणञ्च भवेद्यदि
नद्यादिकप्रवाहेन तदपाक्रियते यदि ४
ततोऽन्यत्रापि संस्थाप्य विधिदृष्टेन कर्मणा
सुस्थितं दुस्थितं वापि शिवलिङ्गं न चालयेत् ५
शतेन स्थापनं कुर्यात् सहस्रेण तु चालनम्
पूजादिभिश्च संयुक्तं जीर्णाद्यमपि सुस्थितम् ६
याम्ये मराडपमीशे वा प्रत्यग्द्वारैकतोरणम्
विधाय द्वारपूजादि स्थरिडले मन्त्रपूजनम् ७
मन्त्रान् सन्तर्प्य सम्पूज्य वास्तुदेवांस्तु पूर्ववत्
दिग्बलिं च बहिर्दत्वा समाचम्य स्वयं गुरुः ८
ब्राह्मणान् भोजयित्वा तु शम्भुं विज्ञापयेत्ततः
दुष्टलिङ्गमिदं शंभोः शान्तिरुद्धरणस्य चेत् ९

रुचिस्तवादिविधिना अधितिष्ठस्व मां शिव
एवं विज्ञाप्य देवेशं शान्तिहोमं समाचरेत् १०
मध्वाज्यक्षीरदूर्वाभिर्मूलेनाष्टाधिकं शतम्
ततो लिङ्गं च संस्थाप्य पूजयेत् स्थण्डिले तथा ११
ॐ व्यापकेश्वरायेति नाटचन्तं शिववादिना
ॐ व्यापकं हृदयेश्वराय नमः । ॐ व्यापकेश्वराय शिरसे नमः
इत्याद्यङ्गमन्त्राः
ततस्तत्राश्रितं तत्त्वं श्रावयेदस्त्रमन्त्रतः १२
सत्त्वः कोऽपीह यः कोऽपि लिङ्गमाश्रित्य तिष्ठति
लिङ्गन्त्यक्त्वा शिवाज्ञाभिर्यत्रेष्टं तत्र गच्छतु १३
विद्याविद्येश्वरैर्युक्तः स भवोऽत्र भविष्यति
सहस्रं प्रतिभागे च ततः पाशुपताणुना १४
हुत्वा शान्त्यम्बुना प्रोक्ष्य स्पृष्ट्वा कुशैर्जपेत्ततः
दत्त्वार्घं च विलोमेन तत्त्वतत्त्वाधिपांस्तथा १५
अष्टमूर्तीश्वरान् लिङ्गपिण्डिकासंस्थितान् गुरुः
विसृज्य स्वर्णपाशेन वृषस्कन्धस्थया तथा १६
रज्वा बध्वा तया नीत्वा शिवमन्तं गृणान् जनैः
तज्जले निक्षिपेन् मन्त्री पुष्ट्यर्थं जुहुयाच्छतम् १७

तृप्तये दिक्पतीनाञ्च वास्तुशुद्धौ शतं शतम्
रक्षां विधाय तद्धाम्नि महापाशुपता ततः १८
लिङ्गमन्यत्ततस्तत्र विधिवत् स्थापयेद् गुरुः
असुरैर्मुनिभिर्गोत्रैस्तन्त्रविद्भिः प्रतिष्ठितम् १९
जीर्णं वाप्यथवा भग्नं विधिनापि न चालयेत्
एष एव विधिः कार्यो जीर्णधामसमुद्धृतौ २०
खड्गे मन्त्रगणं न्यस्य कारयेन् मन्दिरान्तरम्
सङ्कोचे मरणं प्रोक्तं विस्तारे तु धनक्षयः २१
तद्द्रव्यं श्रेष्ठद्रव्यं वा तत् सुकार्यं तत्प्रमाणकम्

इत्याग्नेये महापुराणे जीर्णोद्धारो नाम त्र्यधिकशततमोऽध्यायः

अथ चतुरधिकशततमोऽध्यायः

प्रासादलक्षणम्

ईश्वर उवाच

वक्ष्ये प्रासादसामान्यलक्षणं ते शिखध्वज
चतुर्भागीकृते क्षेत्रे भित्तेर्भागेन विस्तरात् १
अद्रिभागेन गर्भः स्यात् पिण्डिका पादविस्तरात्
पञ्चभागीकृते क्षेत्रेऽन्तर्भागे तु पिण्डिका २

सुषिरं भागविस्तीर्णं भित्तयो भागविस्तरात्
भागौ द्वौ मध्यमे गर्भे ज्येष्ठभागद्वयेन तु ३
त्रिभिस्तु कलसोगर्भः शेषो भित्तिरिति क्वचित्
षोढा भक्तेऽथवा क्षेत्रे भित्तिर्भागैकविस्तरात् ४
गर्भो भागेन विस्तीर्णो भागद्वयेन पिण्डिका
विस्ताराद् द्विगुणो वापि सपादद्विगुणोऽपि वा ५
अर्धार्धद्विगुणो वापि त्रिगुणः क्वचिदुच्छ्रयः
जगती विस्तरार्धेन त्रिभागेन क्वचिद्भवेत् ६
नेमिः पादोनविस्तीर्णा प्रासादस्य समन्ततः
परिधिस्त्र्यंशको मध्ये रथकांस्तत्र कारयेत् ७
चामुण्डं भैरवं तेषु नाट्येशं च निवेशयेत्
प्रासादार्धेन देवानामष्टौ वा चतुरोऽपि वा ८
प्रदक्षिणां वहिः कुर्यात् प्रासादादिषु वा न वा
आदित्याः पूर्वतः स्थाप्याः स्कन्दोऽग्निर्वायुगोचरे ९
एवं यमादयो न्यस्याः स्वस्यां स्वस्यां दिशि स्थिताः
चतुर्धा शिखरं कृत्वा शुकनासा द्विभागिका १०

तृतीये वेदिका त्वग्नेः सकराठो मलसारकः
वैराजः पुष्पकश्चान्यः कैलासो मणिकस्तथा ११
त्रिविष्टपञ्च पञ्चैव मेरुमूर्धनि संस्थिताः
चतुरस्रस्तु तत्राद्यो द्वितीयोऽपि तदायतः १२
वृत्तो वृत्तायतश्चान्यो ह्यष्टास्रश्चापि पञ्चमः
एकैको नवधा भेदैश्चत्वारिंशच्च पञ्च च १३
प्रासादः प्रथमो मेरुर्द्वितीयो मन्दरस्तथा
विमानञ्च तथा भद्रः सर्वतोभद्र एव च १४
चरुको नन्दिको नन्दिर्वर्धमानस्तथापरः
श्रीवत्सश्चेति वैराजान्ववाये च समुत्थिताः १५
बलभी गृहराजश्च शालागृहञ्च मन्दिरम्
विशालश्च समो ब्रह्म मन्दिरं भुवनन्तथा १६
प्रभवः शिविका वेश्म नवैते पुष्पकोद्भवाः
बलयो दुन्दुभिः पद्मो महापद्मक एव च १७
वर्धनी वान्य उष्णीषः शङ्खश्च कलसस्तथा
स्ववृत्तश्च तथाप्येते वृत्ताः कैलाससम्भवाः १८
गजोऽथ वृषभो हंसो गरुत्मान्नृक्षनायकः
भूषणो भूधरश्चान्ये श्रीजयः पृथिवीधरः १९

वृत्तायतात् समुद्भूता नवैते मणिकाह्वयात्
वज्रं चक्रन्तथा चान्यत् स्वस्तिकं वज्रस्वस्तिकम् २०
चित्रं स्वस्तिकखड्गञ्च गदा श्रीकण्ठ एव च
विजयो नामतश्चैते त्रिविष्टपसमुद्भवाः २१
नगराणामिमाः सञ्ज्ञा लाटादीनामिमास्तथा
ग्रीवार्धेनोन्नतञ्चूलम्पृथुलञ्च विभागतः २२
दशधा वेदिकाङ्कृत्वा पञ्चभिः स्कन्धविस्तरः
त्रिभिः कण्ठं तु कर्तव्यं चतुर्भिस्तु प्रचण्डकम् २३
दिक्षु द्वाराणि कार्याणि न विदिक्षु कदाचन
पिण्डिका कोणविस्तीर्णा मध्यमान्ता ह्युदाहृता २४
क्वचित् पञ्चमभागेन महताङ्गर्भपादतः
उच्छ्राया द्विगुणास्तेषामन्यथा वा निगद्यते २५
षष्ट्याधिकात् समारभ्य अङ्गुलानां शतादिह
उत्तमान्यपि चत्वारि द्वाराणि दशहानितः २६
त्रीण्येव मध्यमानि स्युस्त्रीण्येव कन्यसान्यतः
उच्छ्रायार्धेन विस्तारो ह्युच्छ्रायोऽभ्यधिकस्त्रिधा २७
चतुर्भिरष्टभिर्वापि दशभिरङ्गुलैस्ततः
उच्छ्रायात् पादविस्तीर्णा विशाखास्तदुदुंबरे २८

विस्तरार्धेन बाहुल्यं सर्वेषामेव कीर्तितम्
द्विपञ्चसप्तनवभिः शाखाभिर्द्वारमिष्टदम् २९
अधःशाखाचतुर्थांशे प्रतीहारौ निवेशयेत्
मिथुनैः पादवर्णाभिः शाखाशेषं विभूषयेत् ३०
स्तम्भबिद्धे भृत्यता स्यात् वृक्षबिद्धे त्वभूतिता
कूपबिद्धे भयं द्वारे क्षेत्रबिद्धे धनक्षयः ३१
प्रासादगृहशालादिमार्गबिद्धेषु बन्धनम्
सभाबिद्धेन दारिद्र्यं वर्णबिद्धे निराकृतिः ३२
उलूखलेन दारिद्र्यं शिलाबिद्धेन शत्रुता
छायाबिद्धेन दारिद्र्यं बेधदोषो न जायते ३३
छेदादुत्पाटनाद्वापि तथा प्राकारलक्षणात्
सीमाया द्विगुणत्यागाद् बेधदोषो न जायते ३४

इत्याग्नेये महापुराणे सामान्यप्रासादलक्षणं नाम
चतुरधिकशततमोऽध्यायः

अथ पञ्चाधिकशततमोऽध्यायः

नगरादिवास्तुकथनम्

ईश्वर उवाच

नगरग्रामदुर्गाद्या गृहप्रासादवृद्धये

एकाशीतिपदैर्वस्तुं पूजयेत् सिद्धये ध्रुवम् १

प्रागास्या दशधा नाड्यास्तासां नामानि च ब्रुवे

शान्ता यशोवती कान्ता विशाला प्राणवाहिनी २

सती वसुमती नन्दा सुभद्राथ मनोरमा

उत्तरा द्वादशान्याश्च एकाशीत्यङ्घ्रिकारिका ३

हरिणी सुप्रभा लक्ष्मीर्विभूतिर्विमला प्रिया

जया ज्वाला विशोका च स्मृतास्तत्र च पादतः ४

ईशाद्यष्टाष्टकं दिक्षु यजेदीशं धनञ्जयम्

शक्रमर्कं तथा सत्यं भृशं व्योम च पूर्वतः ५

हव्यवाहञ्च पूषाणं वितथं भौममेव च

कृतान्तमथ गन्धर्वं भृङ्गं मृगञ्च दक्षिणे ६

पितरं द्वारपालञ्च सुग्रीवं पुष्पदन्तकम्

वरुणं दैत्यशेषौ च यक्ष्माणं पश्चिमे सदा ७

रोगाहिमुख्यो भल्लाटः सौभाग्यमदितिर्दितिः
नवान्तः पदगो ब्रह्मा पूज्योऽर्धे च षडङ्घ्रिगाः ८
ब्रह्मेशान्तरकोष्ठस्थमायाख्यान्तु पदद्वये
तदधश्चापवत्साख्यं केन्द्रन्तरेषु षट्पदे ९
मरीचिकाग्निमध्ये तु सविता द्विपदस्थितः
सावित्री तदधो द्व्यंशे विवस्वान् षट्पदे त्वधः १०
पितृब्रह्मान्तरे विष्णुमिन्दुमिन्द्रं त्वधो जयम्
वरुणब्रह्मणोर्मध्ये मित्राख्यं षट्पदे यजेत् ११
रोगब्रह्मान्तरे नित्यं द्विपञ्च रुद्रदासकम्
तदधो द्व्यङ्घ्रिगं यक्ष्म षट्सौम्येषु धराधरम् १२
चरकीं स्कन्दविकटं विदारीं पूतनां क्रमात्
जम्भं पापं पिलिपिच्छं यजेदीशादिवाह्यतः १३
एकाशीपदं वेश्म मण्डपश्च शताङ्घ्रिकः
पूर्ववद्देवताः पूज्या ब्रह्मा तु षोडशांशके १४
मरीचिश्च विवस्वांश्च मित्रं पृथ्वीधरस्तथा
दशकोष्ठस्थिता दिक्षु त्वन्ये वेशादिकोणगाः १५
दैत्यमाता तथेशाग्नी मृगाख्यौ पितरौ तथा
पापयक्ष्मानिलौ देवाः सर्वे सार्धांशके स्थिताः १६

यत्पाद्योकः प्रवक्ष्यामि सङ्क्षेपेण क्रमाद् गुह
सदिग्विंशत्करैर्दैर्घ्यादष्टाविंशति विस्तरात् १७
शिशिराश्रयः शिवाख्यश्च रुद्रहीनः सदोभयोः
रुद्रद्विगुणिता नाहाः पृथुष्णोभिर्विना त्रिभिः १८
स्याद्ग्रहद्विगुणं दैर्घ्यात्तिथिभिश्चैव विस्तरात्
सावित्रः सालयः कुडचास्तथा त्रिंशांशतः पृथक् १९
कुडचपृथुपजङ्घोच्चात् कुडचन्तु त्रिगुणोच्छ्रयम्
कुडचसूत्रसमा पृथ्वी वीथी भेदादनेकधा २०
भद्रे तुल्यञ्च वीथीभिर्द्वारवीथी विनाग्रतः
श्रीजयं पृष्ठतो हीनं भद्रोऽयं पार्श्वयोर्विना २१
गर्भपृथुसमा वीथी तदर्धार्धेन वा क्वचित्
वीथ्यर्धेनोपवीथ्याद्यमेकद्वित्रिपुरान्वितम् २२
सामान्यानथ गृहं वक्ष्ये सर्वेषां सर्वकामदम्
एकद्वित्रिचतुःशालमष्टशालं यथाक्रमात् २३
एकं याम्ये च सौमास्यं द्वे चेत् पश्चात् पुरोमुखम्
चतुःशालन्तु साम्मुख्यात्तयोरिन्द्रेन्द्रमुक्तयोः २४
शिवास्यमम्बुपास्यैष इन्द्रास्येयमसूर्यकं

प्राक्सौम्यस्थे च दण्डाख्यं प्राग्याम्ये वातसञ्ज्ञकम् २५
आप्येन्दौ गृहबल्याख्यं त्रिशूलं तद्विनर्धिकृत्
पूर्वशलाविहीनं स्यात् सुक्षेत्रं वृद्धिदायकम् २६
याम्ये हीने भवेच्छूली त्रिशालं वृद्धिकृत् परम्
यक्षघ्नं जलहीनौकः सुतघ्नं बहुशत्रुकृत् २७
इन्द्रादिक्रमतो वच्मि ध्वजाद्यष्टौ गृहाण्यहम्
प्रक्षालानुस्त्रगावासमग्नौ तस्य महानसम् २८
याम्ये रसक्रिया शय्या धनुःशस्त्राणि रक्षसि
धनभुक्त्यम्बुपेशाख्ये सम्यगन्धौ च मारुते २९
सौम्ये धनपशू कुर्यादीशे दीक्षावरालयम्
स्वामिहस्तमितं वेश्म विस्तारायामपिण्डकम् ३०
त्रिगुणं हस्तसंयुक्तं कृत्वाष्टांशैर्हृतं तथा
तच्छेषोऽयं स्थितस्तेन वायसान्तं ध्वजादिकम् ३१
त्रयः पक्षाग्निवेदेषु रसर्षिवसुतो भवेत्
सर्वनाशकरं वेश्म मध्ये चान्ते च संस्थितम् ३२
तस्माच्च नवमे भागे शुभकृन्निलयो मतः
तन्मधे मण्डपः शस्तः समो वा द्विगुणायतः ३३
प्रत्यगाप्ये चेन्दुयमे हट्ट एव गृहावली
एकैकभवनाख्यानि दिक्ष्वष्टाष्टकसङ्ख्यया ३४

ईशाद्यदितिकान्तानि फलान्येषां यथाक्रमम्
भयं नारी चलत्वं च जयो वृद्धिः प्रतापकः ३५
धर्मः कलिश्च नैरुण्यञ्च प्राग्द्वारेष्वष्टसु ध्रुवम्
दाहोऽसुखं सुहृन्नाशो धननाशो मृतिर्धनम् ३६
शिल्पित्वं तनयः स्याच्च याम्यद्वारफलाष्टकम्
आयुःप्राव्राज्यशस्यानि धनशान्त्यर्थसङ्क्षया ३७
शोषं भोगं चापत्यञ्च जलद्वारफलानि च
रोगो मदार्तिमुख्यत्वं चार्थायुः कृशता मतिः ३८
मानञ्च द्वारतः पूर्वे उत्तरस्यान्दिशि क्रमात्
इत्याग्नेये महापुराणे गृहादिवास्तुर्नाम पञ्चाधिकशततमोऽध्यायः

अथ षडधिकशततमोऽध्यायः

नगरादिवास्तुकथनम्

ईश्वर उवाच

नगरादिकवास्तुञ्च वक्ष्ये राज्यादिवृद्धये
योजनं योजनार्धं वा तदर्थं स्थानमाश्रयेत् १
अभ्यर्च्य वास्तु नगरं प्राकाराद्यन्तु कारयेत्
ईशादित्रिंशत्पदके पूर्वद्वारं च सूर्यके २

गन्धर्वाभ्यां दक्षिणे स्याद्वारुणे पश्चिमे तथा
सौम्यद्वारं सौम्यपदे कार्या हट्टास्तु विस्तराः ३
येनेभादि सुखं गच्छेत् कुर्याद् द्वारं तु षट्करम्
छिन्नकर्णं विभिन्नञ्च चन्द्रार्धाभं पुरं न हि ४
वज्रसूचीमुखं नेष्टं सकृद् द्वित्रिसमागमम्
चापाभं वज्रनागाभं पुरारम्भे हि शान्तिकृत् ५
प्राच्र्य विष्णु हरार्कादीन्नत्वा दद्याद् बलिं बली
आग्नेये स्वर्णकर्मारान् पुरस्य विनिवेशयेत् ६
दक्षिणे नृत्यवृत्तीनां वेश्यास्त्रीणां गृहाणि च
नटानाञ्चक्रिकादीनां कैवर्तादेश्च नैर्ऋते ७
रथानामायुधानाञ्च कृपाणानाञ्च वारुणे
शौण्डिकाः कर्माधिकृता वायव्ये परिकर्मणः ८
ब्राह्मणा यतयः सिद्धाः पुण्यवन्तश्च चोत्तरे
फलाद्यादिविक्रयिण ईशाने च वणिग्जनाः ९
पूर्वतश्च बलाध्यक्षा आग्नेये विविधं बलम्
स्त्रीणामादेशिनो दक्षे काण्डारान्नैर्ऋते न्यसेत् १०
पश्चिमे च महामात्यान् कोषपालांश्च कारुकान्
उत्तरे दण्डनाथांश्च नायकद्विजसङ्कुलान् ११

पूर्वतः क्षत्रियान् दक्षे वैश्याञ्छूद्रांश्च पश्चिमे
दिक्षु वैद्यान् वाजिनश्च बलानि च चतुर्दिशम् १२
पूर्वेण चरलिङ्ग्यादीञ्छमशानादीनि दक्षिणे
पश्चिमे गोधनाद्यञ्च कृषिकर्तृंस्तथोत्तरे १३
न्यसेन्म्लेच्छांश्च कोणेषु ग्रामादिषु तथा स्मृतिम्
श्रियं वैश्रवणं द्वारि पूर्वे तौ पश्यतां श्रियम् १४
देवादीनां पश्चिमतः पूर्वास्यानि गृहाणि हि
पूर्वतः पश्चिमास्यानि दक्षिणे चोत्तराननान् १५
नाकेशविष्णवादिधामानि रक्षार्थं नगरस्य च
निर्दैवतन्तु नगरग्रामदुर्गगृहादिकम् १६
भुज्यते तत् पिशाचाद्यैः रोगाद्यैः परिभूयते
नगरादि सदैवं हि जयदं भुक्तिमुक्तिदम् १७
पूर्वायां श्रीगृहं प्रोक्तमाग्नेय्यां वै महानसम्
शयनं दक्षिणस्यान्तु नैर्ऋत्यामायुधाश्रयम् १८
भोजनं पश्चिमायान्तु वायव्यां धान्यसङ्ग्रहः
उत्तरे द्रव्यसंस्थानमैशान्यां देवतागृहम् १९
चतुःशालं त्रिशालं वा द्विशालं चैकशालकम्
चतुःशालगृहाणान्तु शालालिन्दकभेदतः २०

शतद्वयन्तु जायन्ते पञ्चाशत् पञ्च तेष्वपि
त्रिशालानि तु चत्वारि द्विशालानि तु पञ्चधा २१
एकशालानि चत्वारि एकालिन्दानि वच्मि च
अष्टाविंशदलिन्दानि गृहाणि नगराणि च २२
चतुर्भिः सप्रभिश्चैव पञ्चपञ्चाशदेव तु
षडलिन्दानि विंशैव अष्टाभिर्विंश एव हि २३
अष्टालिन्दं भवेदेवं नगरादौ गृहाणि हि
इत्याग्नेये महापुराणे नगरादिवास्तुर्नाम षडधिकशततमोऽध्यायः